# संस्कृत-वार्ताः

**दिनाङ्क :-18.09.2024** **प्रातः - 06:55**

**अथ वार्ताः**

**जम्मू-कश्मीर विधानसभा निर्वाचनम्**

जम्मू-कश्मीरे विधानसभा निर्वाचनस्य प्रथमचरणस्य कृते मतदानं अद्य किञ्चित् कालानन्तरम् एव आरप्स्यते। सप्तमण्डलानां चतुर्विंशतिः निर्वाचनक्षेत्राणि अद्य नैर्वाचानिक समराङ्गणे सन्ति। नवति निर्दलीयैः सह ऊनविंशत्यधिक द्विशतं अभ्यर्थीनां भाग्यस्य निर्णयं त्रयोविंशति लक्षाधिकाः मतदातारः करिष्यन्ति। निर्वाचनाय विस्तृता-सुरक्षाव्यवस्थाः कृताः सन्ति। द्वितीयचरणस्य मतदानम् अस्मिन् मासे पञ्चविंशतिः दिनाङ्के भविष्यति, तृतीयचरणस्य मतदानं च अक्टोबर् मासस्य प्रथमे दिने भविष्यति। मतगणना अक्टोबर् मासस्य अष्टमे दिनाङ्के भविष्यति।

**राष्ट्रपति-जयपुर भ्रमणम्**

राष्ट्रपति पदासीना द्रौपदीमुर्मूः अद्य जयपुरस्य एकदिवसीय यात्रायां भविष्यति। सा मालवीयराष्ट्रीयप्रौद्योगिकीसंस्थायाः (MNIT) जयपुरस्य दीक्षांतसमारोहे, मुख्यातिथिरूपेण भागं गृह्णाति, दीक्षांतसम्बोधनं च करिष्यति। राष्ट्रपतिः छात्राणां कृते षड्शतं शय्यायुक्तस्य नूतनस्य "अरावली छात्रावासस्य" उद्घाटनम् अपि करिष्यति। कार्यक्रमे राजस्थानस्य राज्यपालः हरिभाऊ किसनराव बागडे मुख्यमन्त्री भजनलालशर्मा च भविष्यतः।

**हरियाणा- निर्वाचनम्**

हरियाणायाम् अक्टोबर्-मासस्य पञ्चमे दिनाङ्के भवितुं निश्चितस्य विधानसभानिर्वाचनस्य कृते प्रायः एकत्रिंशदधिकैक सहस्रं यावत् अभ्यर्थिनः नैर्वाचनिक समराङ्गणे सन्ति, हरियाणा-मुख्यनिर्वाचनपदाधिकारी पंकज अग्रवालः ह्यः सूचितवान् यत् तेषु त्रिंशदधिक नव शतं पुरुषाः एकोत्तरैक शतं महिलाः अभ्यर्थिनः च सन्ति। सः अवदत् यत् तेषु द्विषष्ट्याधिक चतुःशतं अभ्यर्थिनः निर्दलीयरूपेण प्रतिस्पर्धां कुर्वन्ति। एतेषु एकविंशत्यधिकैकशतं पुरुषाः, एकचत्वारिंशत् महिलाः अभ्यर्थिनः च सन्ति ।

**नेतन्याहु-रक्षा मंत्री सभा**

इजरायलस्य प्रधानमन्त्री बेन्जामिन नेतन्याहू, रक्षामन्त्री योआव गैलन्टः च लेबनाने घातकपेजर विस्फोटे तल-अवीवनगरस्य हाकिर्या-सैन्यकेन्द्रे सुरक्षामूल्यांकनसभां कृतवन्तौ। अपरपक्षे हिजबुल-सङ्घः उक्तवान् यत्, एतेषां विस्फोटानां कारणानि चिन्तयितुं सुरक्षा-वैज्ञानिक-अनुसन्धानं कुर्वन् अस्ति। अन्यस्मिन् वक्तव्ये समूहेन उक्तं यत् इजरायल्-देशेन कृतः इति आरोपितं, प्रतिकारस्य प्रतिज्ञापि कृता । इजरायल्-देशः एतेषां घटनानाम् उत्तरदायित्वं न स्वीकृतवान् । लेबनानदेशस्य स्वास्थ्यमन्त्रालयेन उक्तं यत्, ह्यः जाते पेजरविस्फोटे न्यूनातिन्यूनम् अष्टजनाः मृताः, हिजबुलसदस्यैः सह अष्टविंशतिः शततोप्यधिकाः जनाः व्रणिताः।

**प्रधानमन्त्री-भुवनेश्वर**

प्रधानमन्त्री श्रीनरेन्द्रमोदी ह्यः ओडिशा सर्वकारस्य महिला-केन्द्रितं पदक्षेपं, सुभद्रा-योजनया साकं भुवनेश्वर-मध्ये रेल-पट्टिकायाः राष्ट्रिय-राजमार्ग-परियोजनायाः च शुभारम्भं कृतवान्। तत्र हि बीजू-पटनायक-अन्ताराष्ट्रिय-विमान-पत्तने प्रधानमन्त्रिणः मोदिनः शुभागमने तस्य भव्यं स्वागतं समनुष्ठितम्, यत्र च आदिवासी-लोक-नृत्यैः ढोल-इत्याख्य-वाद्य-यन्त्रैः च पारम्परिकरीत्या श्रीमोदिनः स्वागत-सपर्या सम्पादिता।

**मोदी-पुरुषहॉकीदलम्**

प्रधानमन्त्री नरेन्द्रमोदी भारतीयपुरुषहॉकीदलस्य अभिनन्दनं कृतवान् यत भारतं हुलुन्बुइर्-नगरे  चीनं दलं एकं शून्यं इत्यांकान्तरालेन पराजितम्।

**।।इति वार्ता:।।**